[1]प्रणिष्यन्-न्ती-ती, [2]प्रतिसितम्, [3]साय:-सायम्, [4]साम, सात्म-सात्म्यम् इति विशेषरूपाणि ।

(1858) "ष्टक प्रतिघाते" (I-भ्वादि:-782. सक. सेट्. पर.) घटादि: ।

घटादित्वात् मित्त्वम्; तेन णिजन्ताद् ह्रस्व: । णमुलि दीर्घविकल्प: । सर्वाण्यपि रूपाणि **चकति** (482) वत् बोध्यानि ।

(1859) "ष्टगे संवरणे" (I-भ्वादि:-790. सक. सेट्. पर.) घटादि: ।

'छगे' इति **क्षीरस्वामी** । **'संवरणम्**=तिरोधानम्' इति **धातुकाव्यव्याख्या** (2-8) । '**ककै** नोच्यते' (143) इति धातुवद्रूपाणि ऊह्यानि ।

(1860) "ष्टन शब्दे" (I-भ्वादि:-461. अक. सेट्. पर.)

'**शब्दे च** देवशब्दे च **स्तनति** स्तनयेत् क्रमात् ।' (श्लो. 127) इति **देव:** ।

'स्तन—' इति **न्यासकार:** (8-3-86) । तत् **भाष्य**विरोधादुपेक्ष्यम् ।

[5]**अभिनिष्टान: अभिनिस्तान:**=विसर्जनीय: । [6]स्तन:, स्तान्यम्, इति विशेषरूपाणि । सामान्यरूपाणि **कगति**वत् (143) बोध्यानि ।

---

1. शतरि 'दिवादिभ्य:—' (3-1-69) इति श्यन् । 'ओत: श्यनि' (7-3-71) इत्योकारलोप: । 'उपसर्गात् सुनोतिसुवति**स्यति**—' (8-3-65) इति षत्वम् । 'नेर्गदनदपतपदघुमा**स्यति**–' (8-4-17) इति णत्वम् ।
2. '**परिनिविभ्य:** सेवसित—' (8-3-70) इत्यत्र निष्ठान्तस्यास्यापि ग्रहणमिति **केचित्** । तेषां मते **परिषितम्, निषितम्, विषितम्** इति षत्वम् । **प्रतिसितम्** इत्यत्र तु न षत्वमिति बोध्यम् ।
3. घञि युगागम: । अवसीयते इति **साय:**=कालविशेष: । अस्यैव '**सायम्**' इति स्वरादिषु (1-1-37) निपातनात् मकारान्तत्वम्, अव्ययत्वं च इति **केचित्** । **अन्ये तु** 'अव्युत्पन्नं प्रातिपदिकम् '**सायम्**' इति' इति वदन्ति ।
4. '**सातिभ्यां**—' (द. उ. 6-81) इति मनिण्प्रत्यये **साम** । तेनैव सूत्रेण त्मन्प्रत्यये **सात्म**=सान्त्वनम् ।
5. 'अकर्तरि च कारके—' (3-3-19) इति संज्ञायां घञ् । '**अभिनिस: स्तन:** शब्दसंज्ञायाम्' (8-3-86) इति षत्वविकल्प: । शाब्दिकसंज्ञायां **अभिनिष्टान:** इति विसर्जनीयस्य नाम । तथा च **आपस्तम्ब:**—' 'द्व्यक्षरं चतुरक्षरं वा नाम पूर्वमाख्यातोत्तरं दीर्घा**भिनिष्टाना**न्तं घोषवदाद्यन्तरान्त:स्थम्' इति । विसर्गस्थानिकजिह्वामूलीयोपध्मानीययो: **अभिनिष्टान:** इति संकेत इति **केचित्** । तत्तु **न्यासपदमञ्जर्यादि**विरोधादुपेक्ष्यम् ।
6. पचाद्यचि **स्तन:** । **स्तान्यम्** इति तु ण्यति बोद्धव्यम् ।